श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीवेदान्तदेशिक यतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ पञ्चामृतस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पञ्चामृतस्तोत्रम् ॥

मालोलं प्रणिपत्याहं स्वर्णश्रीनृहरिं तथा।
मङ्गळाद्रिरमासिंहं कृष्णं नर्तनकोविदम्॥ १ ॥

श्रीरङ्गनाथं हस्तीशं लक्ष्मीभूमिसमन्वितम्।
शेषाचलेशं श्रीवासं यादवाद्रिरमासखम्॥ २ ॥

श्रीभूसुरभिरङ्गेशं श्रीवराहौ हयाननम्।
भूमादिकेशवं चक्रं गोदां वटदळेशयम्॥ ३ ॥

ससीतालक्ष्मणं रामम् अपर्याप्तामृतं हरिम्।
श्रीमूर्तीः श्रीशठारी च सेनेशं शठमाथिनम्॥ ४ ॥

परकालं यतीन्द्रं च वेदचूडागुरूत्तमम्।
आदिवण्शठकोपादीन् यतिवर्यान् भजेऽनिशम्॥ ५ ॥

पञ्चामृतमिदं पुण्यं यः पठेत् सततं मुदा।
रमानरहरिस्तस्य दद्यादीप्सितमादरात्॥ ६ ॥

॥ इति पञ्चामृतस्तोत्रम् समाप्तम् ॥

www.prapatti.com